International Journal of Sanskrit Research 2020; 6(6): 70-74

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(6): 70-74
© 2020 IJSR
www.anantaajournal.com
Received: 08-09-2020
Accepted: 16-10-2020

**अरबिन्दनायकः**

शोधच्छात्रः

राष्ट्रियसंस्कृतविश्वविद्यालयः,

तिरुपतिः आंध्र प्रदेश, भारत

Corresponding Author:

**अरबिन्दनायकः**

शोधच्छात्रः

राष्ट्रियसंस्कृतविश्वविद्यालयः,

तिरुपतिः आंध्र प्रदेश, भारत

# चार्वाक्दर्शनस्य सामान्यस्वरूपविवेचनम्

**अरबिन्दनायकः**

**शोधसारः-**

दृश्यते तत्त्वमनेन इति दर्शनम्।इदं दर्शनं विदुषां दिव्यचक्षुः । भारतीयदर्शनानि आस्तिक- नास्तिकत्वेन द्विधा विभक्तानि वेदस्वीकरणास्वीकरणभेदेन। सांख्यन्यायवेदान्तादीनि आस्तिकानि, बौद्ध- जैनचार्वागादीनि नास्तिकानि। मोक्षः यद्यपि समेषां काम्यः तथापि प्रदर्शितमार्गास्तु भिन्नाः। प्रदर्शितेषु- विविधमार्गेषु बृहस्पतिप्रणीतचार्वाक्दर्शननिर्दिष्टाः मार्गाः इदानीन्तनप्रपञ्चे जनैरत्यन्तं ग्रहणीयाः प्रथिताश्च मन्यन्ते।यतो हि लोकायतबार्हस्पत्यादिभिर्नामभिः श्रूयमाणमिदं दर्शनं भौतिकं भवति। चारु वाक् यस्य सः चार्वाक् । भूमिर्वाय्वनलानिलेभ्य एतेभ्यः भूतचतुष्टयेभ्यः देहस्य सृष्टिः देहैवात्मा । देहस्य प्रत्यक्षत्वात्।"यावज्जीवेद् सुखं जीवेद् ऋणं कृत्वा घृतं पिवेत् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।" इति अस्य नास्तिकशिरोमणिभूतस्य चार्वाक्दर्शनस्य ध्येयवाक्यम्। अङ्गनालिङ्गनजन्यसुखमेव पुमर्थता इति अस्य मतम्। "नास्तिकः वेदनिन्दकः" इति न्यायेन चार्वाक्"त्रयो वेदस्य कर्त्तारो धूर्त्त- भण्डनिशाचरा" इति उक्तिमाध्यमेन वेदं निन्दति । इदं भौतिकत्वात् सांसारिकसुखेन सहास्य सम्पर्कः।

**पारिभाषिकशब्दाः-** प्रपञ्चः, पुरुषार्थः, प्रेयः, अपवर्गः, पारलौकिकः, चैतन्यम्, सौख्यम्, अङ्गना, लोकायतम् भूतः, ज्ञानाधिकरणम्, श्रेयः, प्रग्रहम्, नश्वरः, पुमर्थता।

## प्रस्तावना

वस्तुतः सामान्यतया लौकिकप्रपञ्चे परिदृश्यमानानां पदार्थानां नेत्रेन्द्रियेणावलोकनं दर्शन-मित्युच्यते। परन्तु दर्शनशास्त्रं न तच्छामान्यदर्शनम् अपि तु तात्त्विकदर्शनम्। कीदृशतत्त्वस्य दर्शनमिति चेत् ? परमतत्त्वस्य इति। दृशिर् प्रेक्षणे धातोः ल्युट् प्रत्यये योगे सिद्ध्यति इदं दर्शनपदम्। दृश्यते ज्ञायते परमतत्त्वमनेनेति दर्शनम्।

भारतवर्षे नैके दार्शनिकसम्प्रदायाः दरीदृश्यन्ते। प्रत्येकस्य सम्प्रदायस्य एकः प्रतिष्ठापकाचार्यः तथा

अनेके तस्य पथानुसारिण आचार्याः भवन्त्येव। यद्यपि दार्शनिकसम्प्रदायानां मार्गः विविधः तथापि लक्ष्यस्तु मोक्ष एक एवेति यस्तु मूलभूतं तथा पुरुषार्थचतुष्टये प्रत्येकस्य परमचरमश्च लक्ष्यः। उपनिषद् अपि अस्य मोक्षस्य गरीयसी चर्चां विदधाति। वेदस्वीकरणास्वीकरण- भेदेन दर्शनानाम् अपि आस्तिकनास्तिकभेदेन द्विधा विभागः विहितः। कालक्रमेण एतेषाम् आस्तिक- नास्तिकानां प्रचारप्रसारश्च महता गौरवेण जातः।

अस्तीति भावं ये वहन्ति ते आस्तिकाः। नास्तीति भावं ये वहन्ति ते नास्तिकाः। वेदः साक्षात् ईश्वरम् अङ्गीकरोति । एते नास्तिका ईश्वरस्य सत्तां नाङ्गीकुर्वन्ति अर्थात् परोक्षेण वेदं नाङ्गीकुर्वन्ति। एते श्रुतिप्रमाणविरोधिन अत एते "वेदबाह्येति" कथ्यन्ते। नास्तिकै उद्घोषिततत्त्वं वेदविरोधसंयुतमितिकृत्वा चार्वाकादयः नास्तिकवादिन इत्युच्यन्ते।

चारु रमणीया वा वाक् यस्य सः चार्वाक्। आचार्येण बृहस्पतिना प्रतिष्ठापितमिदं दर्शनं लोकायतबार्हस्पत्यादिभिः नामभिः श्रूयमाणं वर्तते । नास्तिकशिरोमणि इदं चार्वाक्दर्शनम्। इदानीन्तनप्रपञ्चे श्रेयप्रेयमार्गयोः प्रेयमार्गस्तु प्राणिनां रुचिकरो मन्यते ।अतः चार्वाक्दर्शनं मोक्षप्राप्तये प्रेयमार्गः श्रेयस्कर इति मतम् अभिप्रैति।

**चार्वाक्दर्शनस्य सामान्यस्वरूपम् :-**

**प्रमाणस्वरूपविवेचनम् :-**

समेषां तत्त्वानां सत्यासत्यपरीक्षणार्थं प्रमाणानां नितान्तम् आवश्यकता अनुभूयते। अतः सर्वेषु दर्शनेषु प्रमाणानि अङ्गीक्रियन्ते। न्यायदर्शनं प्रत्यक्षानुमानोपमानशाब्देश्चेति प्रमाणचतुष्टयं, सांख्यदर्शनं प्रत्यक्षानुमानागमेति प्रमाणत्रयं, वेदान्तं प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्यनुपलब्धीति प्रमाणषड्कं, बौद्धदर्शनं प्रत्यक्षानुमानं चेति द्विविधं, जैनदर्शनम् प्रत्यक्षंपरोक्षं चेति द्विविधम् तथैव चार्वाक्दर्शनमपि एकमेव प्रत्यक्षं प्रमाणरूपेण स्वीकरोति कारणं नेत्रादीन्द्रियसंयोगेन यत् प्रत्यक्षी- क्रियते तदेव सत्यमिति न्यायेन शरीरमेव स्वीकरोति प्रत्यक्षत्वात् आत्मानम् अस्वीकरोति अप्रत्यक्ष- त्वात् न तु अनुमानोपमानशाब्दादीन्।

**आत्मनः स्वरूपविवेचनम् :-**

आत्मतत्त्वं वेदान्तस्य उपनिषदां च प्रमुखविषयः। कठोपनिषदानुसारम्:- "आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च, इन्द्रियाणि हयान्याहुः, विषयांस्तेषुगोचरान्। आत्मेद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः"।[1]गीतायां च आत्मनः स्थितिवर्णना- प्रसङ्गे आत्मानं नित्यम्[2], अविनाशी[3] इति उक्तम् ।पुनश्च आत्मनः शरीरपरिवर्तनविषये भगवता गीतायामुक्तम् :-

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि।
तथा शरीराणि विहाय जीर्णा न्यन्यानि संयाति नवानि देही ।।[4]

**तत्रेव भगवता आत्मारूपेण स एव भूतशरीरस्थ इति उक्तम् :-**

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यञ्च भूतानामन्त एव च।।[5]

वेदान्तोऽपि एनम् आत्मानं ब्रह्मनाम्ना[6] एकं नित्येति प्रतिपादयति। न्यायदर्शनमपि शरीरमध्यस्थम् आत्मानं ज्ञानाधिकरणरूपेण एकं बिभुः नित्यञ्च इति[7] प्रतिपादयति । परन्तु चार्वाक्दर्शनम् आत्मानं

---

[1] कठोपनिषद्, ३/३

[2] अन्तवन्त इमे देहा नित्यस्योक्ता शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।। गीता २/१८

[3] अबिनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ।।गीता २/१७

[4] गीता २/२२

[5] गीता१०/२०

[6] अयमात्माब्रह्म,माण्डूक्य १/२

[7] त.सं, पृ-१३२

किमपि विशिष्टमिति न स्वीकरोति तथा अयम् आत्मा देहीति अस्य अस्वीकारः। बृहस्पतेः मतेन तु "नैवात्मापारलौकिकः"[8] इति।

यदि गच्छेत् परं लोकं, देहादेष विनिर्गतः।
कस्माद् भूयो न चायाति, बन्धुस्नेहसमाकुलः।।[9]

**श्राद्धस्वरूपविवेचनम् :-**

धर्मशास्त्रग्रन्थेषु एकोद्दिष्ट-[10] पार्वण-[11] सपिण्डन-[12] नित्य-[13] श्राद्धविषये वर्णना प्राप्यते। श्रद्धया दीयते इति श्राद्धम्। श्राद्धलक्षणं ब्रह्माण्डपुराणे उच्यते । तद्यथा :-

देशे काले च पात्रे च श्रद्धया विधिना च यत्।
पितृनुद्दिश्य विप्रेभ्यः दत्तं श्राद्धमुदाहृतम् ।।[14]

पितृपादानाम् आत्मनः तृप्त्यर्थे श्राद्धं दीयते। रामायणे दशरथस्य श्राद्धदिवसे रामचन्द्रः सिकताः दशरथतृप्तये समर्पितवन्त इति प्रमाणं प्राप्यते । इदं चार्वाक्दर्शनं श्राद्धं व्यर्थमिति परिकल्पयति :-

मृतानामपि जन्तूनां, श्राद्धं चेत् तृप्तिकारणम् ।
गच्छतामिहजन्तूनां व्यर्थं पाथेयकल्पनम्।।[15]
स्वर्गस्थिता यदा तृप्तिं, गच्छेयुस्तत्र दानतः ।
प्रासादस्योपरिस्थानाम्, अत्र कस्मान्न दीयते ।।[16]

**पुरुषार्थस्वरूपविवेचनम् :-**

सामान्यतया अस्माभिः श्रूयमाणः पुरुषार्थः धर्मार्थकाममोक्षा एव। परन्तु बृहस्पतेः मतेन "अङ्गनालिङ्गनजन्यसुखमेव पुमर्थता"[17]। स्त्रीसङ्गेन दुःखसम्पर्कः सत्यपि तं पुरुषार्थः न इति वक्तुं शक्यते कारणं दुःखसत्वेपि तत् त्यक्त्वा केवलं सुखम् उपभोक्तुं शक्यते । यथा मत्स्यभक्षी कणकान् परित्यज्य सारं एव खादति, यथा धान्यार्थी मिश्रितानि तृणानि विहाय धान्यमेव गृह्णाति तथैव स्त्रीसङ्गः दुःखसत्त्वेपि दुःखभयेन सुखं न परित्यक्तव्यम्। किं नहि मृगाः सन्तीति कृत्वा शालयोः नोप्यन्ते नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रयन्ते । यदि कश्चित् भयेन सुखं त्यजति चेत् सः पशुतुल्यमूर्खो भवति।

**वैदिकविषयविवेचनम् :-**

वेदस्य कर्त्तुत्वविषये वेदभाष्यकारैः सायणाचार्यैः स्वस्य भाष्ये "अपौरुषेयवाक्यं वेदः" इति उल्लिखितम्। अर्थात् न कोऽपि वेदस्य कर्त्ता। पुनश्च पराशरेणोक्तम् :-

न कश्चिद् वेदकर्त्ता स्यात् वेदस्मर्त्ता चतुर्मुखः।
वेदो नारायणः साक्षात् स्वयम्भुरिति शुश्रुमः।[18]

**मनुस्मृतौ वेदगततत्त्वविषये उच्यते :-**

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्त्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।[19]

परन्तु चार्वाक्दर्शनम् एतच्छर्वं नाङ्गीकरोति। चार्वाक् मतेन तु वेदस्य कर्त्तारः धूर्त्तभाण्डनिशाचरा इति एवं च पण्डितानां वचांसि

---

8 स.द.सं -२०,पृ-९

9 स.द.सं -२६,पृ-१०

10 एकोद्दिष्टं देवहीनमेकार्धैकपवित्रकम् ।
आवाहनाग्नौकरणरहितम् ह्य परसव्यवत्।।या.स्मृ.श्राद्धप्रकरणम् -५१.पृ-५६

11 चतुर्दश्यष्टमी चैव अमावास्या च पुर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसंक्रमणं तथा।।विष्णुपुराणम्

12 प्रेताय पिण्डदानं तु द्वादशाहं समाचरेत् ।
पाथेयं तस्य तत्प्रोक्तं यतः प्रीतिकरं महत्।।मत्स्यपुराणम्-१६/५

13 अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्त्तितम् ।
वैश्वदेवविहीनं तदशक्तावुदकेन तु ।।भविष्यपुराणम्

14 ब्र.पु

15 स.द.सं -२३,पृ-९

16 स.द.सं- २४,पृ-१०

17 स.द.सं- ९,पृ-३

18 पराशरः

19 मनु.२/३

जर्फरीतुर्फरीवत्। अग्निहोत्र्यादि वैदिककर्माणि प्रज्ञापौरुषहीनानां कार्यमिति। आचार्यबृहस्पतेः भाषायाम् :-

"त्रयो वेदस्य कर्त्तारो धूर्त्तभण्डनिशाचराः ।
जर्फरी तुर्फरीत्यादि पण्डितानां वचः स्मृतः।।[20]

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
प्रज्ञापौरुषहीनानां, जीविकेति बृहस्पतिः।।[21]

वेदेषु यागयज्ञानां प्रभूतवर्णना प्राप्यते, यतो हि ईश्वरस्य प्रत्यक्षकरुणाप्राप्त्यर्थं यज्ञा एव कारणभूताः। ज्योतिष्टोमे यागे पशुवलिप्रदानेन सः पशुः स्वर्गं[22] गच्छतीति नियम अस्ति। अस्मिन् प्रसङ्गे चार्वाक् वेदमतं भर्त्सयति। तदनुसारम् :-

पशुश्चेन्निहतं स्वर्गं, ज्योतिष्टोमे गमिष्यति।
स्वपिता यजमानेन, तत्र कस्मान्न हन्यते ।।[23]

**चातुवर्ण्याश्रमविवेचनम् :-**

परमपुरुषेभ्यः चत्वारः वर्णाः सम्भूताः। उक्तं च शुक्लयजुर्वेदे :-

ब्राह्मणोऽस्य मुखमासीद्, बाहू राजन्यकृतः ।
ऊरू तदस्य यद्वैश्यः, पद्-भ्यां शूद्रो अजायत।।[24]

एवं च भगवता चतुर्वर्णानां सर्जनं संपाद्य गुणकर्मानुसारेण विभागः कृतः। उक्तं च भगवता श्रीकृष्णेन गीतायाम् :-

[20] स.द.सं- २८,पृ-११

[21] स.द.सं- २१,पृ-९

[22] "सन्ते प्राणोवातेन गच्छता गोसमङ्गानि यजतरैः संयजमाना आशीशा"।शुक्लयजु,काण्व-षष्ठाध्यायः

[23] स.द.सं- २२,पृ-९

[24] शुक्लयजुः, पुरुषसूक्तम्, ११/३१

चातुर्वर्ण्यं मया सृष्टं गुणकर्म विभागशः।
तस्य कर्त्तारमपि मां विद्यकर्त्तारमव्ययम् ।।[25]

वेदान्तपुराणादिषु वर्णितचतुर्दशभुवनेषु सुरपुररूपेण स्वर्गस्य प्रसिद्धिः। अपवर्गः मोक्षः। मोक्षप्राप्तेरनन्तरं संसारचक्रे पुनः घूर्णायमानस्यावश्यकता न आयाति। अर्थात् पुनः नश्वरप्रपञ्चं प्रति अनागमनम् एवापवर्गः। पुनश्च स्मृतिग्रन्थेषु तथा कौटिल्यार्थशास्त्रे चातुर्वर्ण्यानां चतुराश्रमाणां च कर्त्तव्यं सम्यगालोचितम् । समाजं सुष्ठु परिचालयितुं एतेषु दायित्ववण्टनं कृतं वर्तते। इदं चार्वाक्- दर्शनम् अपवर्गेण सह वर्णाश्रमाणां कर्मणाम् अनादरं करोति। ईश्वरो भवति मोक्षद इति अस्य अस्वीकारः।

न स्वर्गो नापवर्गो वा, नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिका।।[26]

प्रत्येकं मनुष्यजीवने धर्मार्थकाममोक्षेति चतुर्वर्गाः भवन्ति ।परन्तु चतुर्वर्गेषु अन्तिममोक्षप्राप्तये धर्मः मुख्यसोपानम् ।तदर्थम् अर्थस्यावश्यकता अर्थोपाजनार्थं कामना अवश्यं स्यात्।परन्तु सा कामना अत्यधिका न स्यात् येन अधर्मो भवति। धनार्जनं धर्मेण स्यात् । सुखं च ब्रह्मज्ञानजनितं न तु कामनायाः परिपूर्त्तिजनितम् ।परन्तु एतद्विपरीतचिन्तनं चार्वाक्दर्शनस्य।तद्रीत्या :-

यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।[27]

इदं दर्शनं भौतिकदर्शनत्वात् सांसारिकसुखम् अतिशयेन वाञ्छति।

[25] गीता- ४/१३

[26] स.द.सं-२०,पृ-९

[27] स.द.सं-२५,पृ-१०

**भूतानां स्वरूपविवेचनम् :-**

सांख्यवेदान्तादिशास्त्रेषु "क्षित्यप्तेजमरुतव्योमः" इति पञ्चमहाभूतानां वर्णना वर्तते। परन्तु चार्वाक्दर्शनं "भूमिर्वाय्वनलानिला" इति भूतचतुष्टयं स्वीकरोति। एतेभ्यः देहरुत्पद्यते। किण्वादिभ्यः मदशक्तेः सम्भवः यथा तथैव देहाकारैः परिणतभूतचतुष्टयात् चैतन्यं जायते। पुनः भूतचतुष्टयस्य विनाशेन देहः विनश्यति।:-

अत्र चत्वारि भूतानि, भूमिर्वाय्वनलानिलाः ।
चतुर्भ्यः खलु भूतेभ्यः,चैतन्यम् उपजायते ।।[28]

**उपसंहारः-**

सर्वाणि दर्शनानि तात्त्विकज्ञानं प्रयच्छन्ति। अपवर्गप्राप्तिजनितचिन्तनं समेषां दर्शनानां शिरोमण्डनं करोति।परन्तु तत्प्राप्तये पन्थानस्तु नैके।आस्तिकानां मतेन तु श्रुतिवचनानुपालनेनापवर्गः नास्तिकाः वेदनिन्दका अर्थात् ईश्वरस्य सत्तां नाङ्गीकुर्वन्ति। ते विनेश्वरम् अपवर्गप्राप्तिरिति अभिप्रयन्ति। अधुनातनपृथिव्यां जनाः क्षणिकसांसारिकसुखं वाञ्छन्ति । नास्तिकशिरोमणिः चार्वाक्दर्शनम् अत्यन्तं भोतिकम् अत इदं तदेव प्राथमिकतया निर्दिशति । आत्मा किमपि पारलौकिकं न भवति अपि तु देहरेवात्मा देहस्य प्रत्यक्षत्वात् इति अस्य मतम् । सर्वतोरूपेण इदं दर्शनं जीवान् भौतिकजगत इन्द्रियसौख्यं प्रति आकर्षयति।

**सहायकग्रन्थसूची :-**


1. सर्वदर्शनसंग्रहः-संपादकः-वासुदेवशास्त्रिविरचिता, प्रकाशकः-प्राच्यविद्याशंसोधनमन्दिरः, मुम्बई, १९२४
2. श्रीमद्भगवद्गीता-संपादकः-प्रकाशकः-जयदयाल गोयन्दका, गीता प्रेस, गोरखपुर, २०१२
3. तर्कसंग्रहः-संपादकः-राकेशशास्त्री, प्रकाशकः-चौखम्बा-संस्कृत-प्रतिष्ठानम्, वारणासी, २०१६
4. वेदान्तसारः-संपादकः-श्री रामशरणत्रिपाठी,प्रकाशकः-चौखम्बा विद्याभवनम्, वारणासी, २०१६
5. कठोपनिषद्-संपादकः-घनश्यामदाश जालान्, प्रकाशकः-गीता प्रेस, गोरखपुर, २००८
6. याज्ञवलक्यस्मृतिः-संपादकः-डा. गङ्गासागररायः, प्रकाशकः-चौखम्बा-संस्कृत-प्रतिष्ठानम्, २००८


[28] स.द.सं-१३,पृ-५